ISSN 2249 - 2313

षाण्मासिकी संस्कृतशोधपत्रिका

Half Yearly Sanskrit Research Journal

Vol. IX Oct,2016 - Mar,2017 No.2

वर्षम् – ९, अक्टूबर २०१६ – मार्च २०१७, अङ्कः – द्वितीयः

# प्राचीसुधा

# *PRACI SUDHA*

"प्राचीसुधा" सुललिता बहुशास्त्रतत्त्व-
पूर्णा जगज्जनहिताऽखिललोकमान्या ।
आध्यात्मिकीं सुखकथां परिवेषयन्ती
संराजतां निरभिमानबुधेषु नित्यम् ।।

सम्पादकः सञ्चालकश्च

डॉ.विश्वनाथस्वाईं

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्, पुरी, ओड़िशा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY

PURI, ODISHA

Scanned by CamScanner

# वैदिकसाहित्ये अग्निः

डॉ. शत्रुघ्नपाणिग्राही

वेदः मानवमात्रस्य प्राणस्वरूपः भवति । स च यज्ञद्वारा विश्वं सृजति, पालयति, विनाशयति च । अतः विश्वस्य सृष्टि-स्थिति-विनाशानां यन्मौलिकं तत्त्वं तत् वेदशब्देन आख्यायते । वेदः यज्ञप्रधानः इत्युक्तं मनुना –

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध्यर्थमृग्यजुःसामलक्षणम् ।।[१] इति ।

यज्ञस्तावद् भवति द्रव्यदेवतासंयोगः । देवान् उद्दिश्य घृत-दधि-मधु-सोमादिद्रव्याणां त्यागः नाम दानं यागः भवति ।[२] तस्मिन् यज्ञ अग्निदेवः प्रधानः भवति । मन्त्रकारैः प्रपञ्चोऽयं "भूमिः अन्तरिक्षं द्यौः" इति त्रिधा दृष्टः । तत्र द्यौरित्यनेन सूर्यस्य स्थानम् । अन्तरिक्षमित्यनेन इन्द्रवायुवृष्टिविद्युतां स्थानं च विवक्षितम् । अग्निश्च भूस्थानस्य देवः भवति । यास्कप्रणीतनिरुक्तग्रन्थेऽपि लिखितमस्ति – "तिस्र एव देवताः" इति ।[३] परन्तु वैदिकमन्त्राणानुशीलनेन ज्ञायते प्रधानभूतस्याग्नेः लौकिकाग्निरूपेण भूमौ, विद्युद्रूपेणान्तरिक्षे, दिव्याग्निरूपेण सूर्ये चावस्थानमधिकृत्य प्रवृत्तैरविस्पष्टार्थैः प्रहेलिकाप्रायैः सूक्तैरपि देवानां सर्वेषामेकदेवताप्रभेदात्मकत्वमेवाभिव्यज्यते । "अग्निः सर्वा देवताः"[४] इति ऐतरेयब्रह्मणस्य कथनेन सर्वेषामेकदेवतात्मकत्वं सिद्ध्यति । तत्तदाश्रयभेदादप्यग्नेर्भेदो वर्ण्यते । अग्निः एकः द्वौ त्रयः चत्वारो वा जायमानायां विप्रतिपत्तौ वैदिकयज्ञेषु त्रीणि स्वरूपाणि अग्नेः दृश्यन्ते । यथा – आहवनीयाग्निः दक्षिणाग्निः गार्हपत्याग्निश्चेति । परन्तु लौकिकयज्ञेषु अग्नेः बहूनि नामानि आयान्ति । अपि च शवदाहकर्मणि क्रव्यादग्नेः प्रयोगः भवति । अयं प्रतिगृहं प्रतिवसति । किन्तु बहुत्र दीप्यमानोऽयमेक एव । तथा बहुत्र विप्रकीर्णत्वेन स्थितोऽयमेक एव सा एवायं राजा च । अन्येऽग्नयो वृक्षस्य शाखा इव तस्यैव विकाशरूपाः । स नानाविधानि दिव्यरूपाणि धारयति । अतः स विविधनामधेयो भवति । परन्तु सर्वे देवास्तस्मिन्नेव लीनाः । यान् खलु परिधिररानिव स परिवेष्टयति । इत्यमग्नेर्नानारूपाणि अधिकृत्य प्रवृत्ता एते कल्पनाविशेषाः सर्वेषां देवानामेकदेवतात्मकरूपमेकदेवतादमुपस्थापयन्ति ।

अग्निशब्दस्य निर्वचनकाले एवं कथितमस्ति यत् "अग्रणीर्भवति । अग्नं यज्ञेषु प्रणीयते । अङ्गं नयति सन्नममानः" इति ।[५] अर्थात् सर्वेषामग्रे विद्यमानः

Scanned by CamScanner

यः देवः सः अग्निरिति कथ्यते । "अगि"-गतौ इति धातोः "नी" प्रत्यये अग्निशब्दः व्याकरणमतेन निष्पन्नः भवति । शाकपूर्णे मतानुसारम् – अग्निः त्रिभ्य आख्यातेभ्यो जायत इति । इतात् अक्ताद्दग्धाद्वा नीतात् ।[६] अग्नेः प्रमुखं कर्म दहनं पापात्मनामुच्छेदनं च । यास्कमतेन अग्नेः कर्म यथा –

वहनं च हविषामावाहनं च देवतानाम् ।
यच्च किञ्चिद् दार्षिविषयकमग्निकर्मैव तत् ।।[७]

अग्निः देवानां होता भवति । तथाहि – "अग्निर्होता"[८] इति । एवञ्च देवान् प्रति हविषः वहनकर्ता दूतरूपः भवति । यदुक्तं – "अग्निदूतं पुरो दधे हव्यवाहमुपब्रुवे"[९] इति । अग्निरेष यज्ञनिर्माहकत्वात् "पुरोहितः"[१०] इति उच्यते । अयमेक एव देवो "गृहपति"[११] शब्देन व्यपदिश्यते ऋग्वेदे । स च नश्वराणां मध्ये स्वस्थानमकल्पयत् । अर्त्यानां गृहमागतमेनम् "अतिथिः"[१२] इत्याहुः । पुनः सर्वेषां जीवानां हृदि जठराग्निरूपेण वनस्पतिषु दावाग्निरूपेण जलेषु वाडवाग्निरूपे जीवजगतः प्रत्येकं द्रव्येषु स्थूलरूपेण सूक्ष्मातिसूक्ष्मरूपेण वा अग्निः विद्यमानः । तत्तु कोऽपि नाङ्गीकर्तुं न शक्नोति । "यस्त सूक्तं भजते, यस्मै हविर्निरूप्यतेऽयमेव सोग्निर्वैश्वानरः[१३] इति निरुक्तस्य वचनम् । अतः वेदेषु अग्नेः स्वरूपं ब्रह्मरूपेण स्तूयते । यद्यथा – "ब्रह्म वै अग्नि"रिति ।

दर्शनयोग्यं यत्कर्म तत्सर्वमग्नेरधीनम् । ऋग्वेदे सर्वेषां मण्डलानामारम्भे अग्निस्तुतिः विद्यते । यथा – "अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम्[१४] इत्यादि । एवञ्च अग्निदेवः सर्वेषां देवानां प्रतिनिधिभूतः भवति । ऋषयोऽस्य नानाजन्मानि नानारूपाणि नानास्थानानि च परामृशन्ति । ते काष्ठखण्डद्वयाभिघर्षणेन अहरहरुत्पद्यमानोऽयम् इति वदन्ति ।[१५] अस्योत्पादनकत्वेन स्तूयमाना दशकन्यकाः काष्ठखण्डघर्षणार्थमूर्ध्वं प्रसारिताः श कराङ्गुल्य एव । अग्निरुत्पत्तिः अन्तरिक्षलोकात् जाता[१६] इति हेतो अयं "अपां पात्" इति कथ्यते । अग्नेरुत्पत्तिः द्युलोके अभवत् । मातरिश्वा तं पृथिवीलोकं ति आनीतवतीति श्रूयते ऋग्वेदे[१७] । अपि चास्य निष्पत्तौ महत्याः शक्तेरपक्षणादयं सहसस्पुत्रः"[१८] इत्युच्यते । शुक्लयजुर्वेदे अग्निदेवः परब्रह्मणः मुखात् जातः ति श्रूयते । यथा – "मुखादग्निरजायत"[१९] इति पुरुषसूक्तं भणति । याज्ञिकाः ग्नेः पितृनाम द्यौः इति कथयन्ति । यथा – "यदेनं द्यौर्जनयत् सुरेताः"[२०] इति । त्र वर्ण्यमाना अग्नेरवयवाः सर्वे यज्ञियाग्निा सङ्गता एव । घृतेन

प्रज्वालज्यमानोऽग्निः घृतपृष्ठः[२१], घृतमुखः, घृतकेशः[२२], घृताहवनः[२१] इत्युच्यते ।
अग्नेः चक्षुः घृतं भवति । यदुक्तं "घृतं मे चक्षुः" इति । समिधमस्य भोजनम् ।[१८]
अस्य जिह्वा एकाऽनेका वा । तीक्ष्णैरात्मनो दन्तैः अयं वनानि खादति ।
अग्निरयमुपासकानामनुग्राहकः । यस्तावदस्मै हवींष्यर्पयति तमयं
सहस्रेणाक्षिभिरीक्षते । स्वभक्तानामरातीन् शुष्केन्धनानीव भस्मसात् करोति ।
अपि चास्मिन् सर्वे निधयः सम्भृताःधनस्य द्वारमयमुद्घाटति । सोऽयमग्निः गृहसम्पदं
सन्ततिं सर्वविधानि श्रेयांसि च वितरति । यथा –

"अग्निना रयिमश्नवत्पोषमेव दिवेदिवे । यशसं वीरवत्तमम् ।[२५]

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् अग्निदेवं विना जगदिदं क्षणमपि स्थातुं न पारयति । अग्निरेव एकः देवः यः विभिन्नदेवैः कर्मानुसारं स्तूयते । अतः परब्रह्मस्वरूपः अग्निरेव एकः सर्वभूतेषु गूढः वर्त्तते इत्यस्ति अग्निदेवस्य स्वरूपम् ।

---


सन्दर्भसूची –

१. मनुस्मृतिः – १/२३ ।
२. कात्यायनश्रौतसूत्रम् – १/२/२ ।
३. निरुक्तम् – ७/२ ।
४. ऐतरेयब्राह्मणम् – २/३ ।
५. निरुक्तम् – ७/४ ।
६. निरुक्तम् – ७/४ ।
७. निरुक्तम् – ७/३ ।
८. ऋग्वेदः – १/५, निरुक्तम् – ६/८ ।
९. ऋग्वेदः – ८/४४/३, अग्निं दूतं वृणीमहे – ऋग्वेदः – १०/९१/२ ।
१०. ऋग्वेदः – १/१ ।
११. ऋग्वेदः – १/१२/६ ।
१२. स दर्शतश्ररतिथिर्गृहे । ऋग्वेदः – १०/९१/२ ।
१३. निरुक्तम् – ७/३१ ।
१४. ऋग्वेदः – १/१ ।
१५. जायमानो मातरा गर्भो अत्ति । ऋग्वेदः – १०/७९/४ ।
१६. ऋग्वेदः – ४/५८/८ ।
१७. य जायमानः परमे व्योमन्याविररग्निरभवन्मातरीश्वेन । ऋग्वेदः– १/१४३/२ ।
१८. ऋग्वेदः – १/९६/३ ।
१९. यजुर्वेदः – ३१/१२ ।
२०. ऋग्वेदः – ५/५/५ ।
२१. ऋग्वेदः – १/१४/६ ।
२२. ऋग्वेदः – ८/६०/२ ।
२३. ऋग्वेदः – १/१२/५ ।
२४. शुक्लयजुर्वेदः – ३/१ ।
२५. ऋग्वेदः – १/१/३ ।


—०—

वेदवेदाङ्गसंकायाध्यक्षः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेलावल, गुजरात

Scanned by CamScanner